श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीभगवद्रामानुजमुनिभिः अनुगृहीतं

# ॥ श्रीवैकुण्ठगद्यम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीवैकुण्ठगद्यम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

यामुनार्यसुधाम्भोधिं अवगाह्य यथामति।
आदाय भक्तियोगाख्यं रत्नं सन्दर्शयाम्यहम् ॥

स्वाधीन त्रिविध चेतनाचेतन स्वरूपस्थितिप्रवृत्तिभेदं ⋆
क्लेशकर्माद्यशेषदोषासंस्पृष्टं ⋆
स्वाभाविकानवधिकातिशय ज्ञान बलैश्वर्य
वीर्यशक्तितेजः प्रभृत्यसङ्ख्येय
कल्याणगुणगणौघमहार्णवं ⋆
परमपुरुषं ⋆
भगवन्तं ⋆
नारायणं ⋆
स्वामित्वेन सुहृत्त्वेन गुरुत्वेन च परिगृह्य ⋆
ऐकान्तिकात्यन्तिक तत्पादाम्बुजद्वय परिचर्यैकमनोरथः ⋆
तत्प्राप्तये च तत्पादाम्बुजद्वय प्रपत्तेरन्यन्न मे
कल्पकोटि सहस्रेणापि साधनमस्तीति मन्वानः ⋆
तस्यैव भगवतो नारायणस्य ⋆
अखिलसत्त्व दयैकसागरस्य ⋆
अनालोचित गुणगणाखण्डजनानुकूलामर्याद शीलवतः ⋆
स्वाभाविकानवधिकातिशय गुणवत्तया ⋆
देवतिर्यङ्मनुष्याद्यखिलजन हृदयानन्दनस्य ⋆

आश्रितवात्सल्यैकजलधेः ⋆
भक्तजनसंश्लेषैकभोगस्य ⋆
नित्यज्ञानक्रियैश्वर्यादि भोगसामग्रीसमृद्धस्य ⋆
महाविभूतेः ⋆
श्रीमच्चरणारविन्दयुगळं ⋆
अनन्यात्म सञ्जीवनेन ⋆
तद्गतसर्वभावेन ⋆
शरणमनुव्रजेत् ॥

ततश्च प्रत्यहमात्मोज्जीवनाय एवमनुस्मरेत् ⋆
चतुर्दशभुवनात्मकमण्डं ⋆
दशगुणितोत्तरं च आवरणसप्तकं ⋆
समस्तं कार्य कारणजातमतीत्य वर्तमाने ⋆
परमव्योमशब्दाभिधेये ⋆
ब्रह्मादीनां वाङ्मनसाऽगोचरे ⋆
श्रीमति वैकुण्ठे दिव्यलोके ⋆
सनकविधिशिवादिभिरपि अचिन्त्यस्वभावैश्वर्यैः ⋆
नित्यसिद्धैः ⋆
अनन्तैः ⋆
भगवदानुकूल्यैकभोगैः ⋆
दिव्यपुरुषैः ⋆
महात्मभिरापूरिते ⋆
तेषामपि इयत्परिमाणं इयदैश्वर्यं
ईदृशस्वभावं इति परिच्छेत्तुमयोग्ये ⋆
दिव्यावरणशतसहस्रावृते ⋆
दिव्यकल्पतरूपशोभिते ⋆
दिव्योद्यानशतसहस्रकोटिभिरावृते ⋆

अतिप्रमाणे दिव्यायतने ⋆
कस्मिंश्चित् विचित्र दिव्यरत्नमये दिव्यास्थानमण्डपे ⋆
दिव्यरत्नस्तम्भ शतसहस्रकोटिभिरुपशोभिते ⋆
दिव्यनानारत्नकृतस्थलविचित्रिते ⋆
दिव्यालङ्कारालङ्कृते ⋆
परितः पतितैः पतमानैः पादपस्थैश्च
नानागन्धवर्णैर्दिव्यपुष्पैः
शोभमानैः दिव्यपुष्पोपवनैरुपशोभिते ⋆
सङ्कीर्णपारिजातादिकल्पद्रुमोपशोभितैः ⋆
असङ्कीर्णैश्च कैश्चिदन्तस्स्थ पुष्परत्नादि निर्मित
दिव्यलीलामण्डप शतसहस्रोपशोभितैः ⋆
सर्वदाऽनुभूयमानैरपि अपूर्ववदाश्चर्यमावहद्भिः ⋆
क्रीडाशैलशतसहस्रैरलङ्कृतैः ⋆
कैश्चित् नारायणदिव्यलीलाऽसाधारणैः ⋆
कैश्चित् पद्मवनालयादिव्यलीलाऽसाधारणैः ⋆
साधारणैश्च कैश्चित् शुकशारिकामयूरकोकिलादिभिः
कोमलकूजितैराकुलैः ⋆
दिव्योद्यानशतसहस्रकोटिभिरावृते ⋆
मणिमुक्ताप्रवालकृतसोपानैः ⋆
दिव्यामलामृतरसोदकैः ⋆
दिव्याण्डजवरैः ⋆
अतिरमणीयदर्शनैः ⋆
अतिमनोहरमधुरस्वरैः ⋆
आकुलैः ⋆
अन्तस्थ मुक्तामय दिव्यक्रीडास्थानोपशोभितैः ⋆
दिव्य सौगन्धिकवापीशतसहस्रैः ⋆

दिव्यराजहंसावलीविराजितैरावृते ⋆
निरस्तातिशयानन्दैकरसतया च आनन्त्याच्च प्रविष्टान्
उन्मादयद्भिः क्रीडोद्देशैर्विराजिते ⋆
तत्र तत्र कृत दिव्यपुष्पपर्यङ्कोपशोभिते ⋆
नानापुष्पासवास्वाद मत्तभृङ्गावलीभिरुद्गीयमान
दिव्यगान्धर्वेणापूरिते ⋆
चन्दनागरुकर्पूर दिव्यपुष्पावगाहि मन्दानिलासेव्यमाने ⋆
मध्ये दिव्यपुष्पसञ्चयविचित्रिते ⋆
महति दिव्ययोगपर्यङ्के ⋆
अनन्तभोगिनि ⋆
श्रीमद्वैकुण्ठैश्वर्यादि दिव्यलोकं
आत्मकान्त्या विश्वमाप्याययन्त्या ⋆
शेषशेषाशनादिकं सर्वं परिजनं
भगवतस्तत्तदवस्थोचित परिचर्यायां आज्ञापयन्त्या ⋆
शीलरूपगुणविलासादिभिः आत्मानुरूपया
श्रिया सहासीनम् ⋆
प्रत्यग्रोन्मीलित सरसिजसदृश नयनयुगळम् ⋆
स्वच्छनीलजीमूतसङ्काशम् ⋆
अत्युज्ज्वलपीतवाससम् ⋆
स्वया प्रभया अतिनिर्मलया अतिशीतलया अतिकोमलया
स्वच्छ माणिक्याभया कृत्स्नं जगदुद्भासयन्तम् ⋆
अचिन्त्य दिव्याद्भुत नित्ययौवन
स्वभावलावण्यमयामृतसागरम् ⋆
अतिसौकुमार्यात् ईषत् प्रस्विन्नवदालक्ष्यमाण
ललाटफलक दिव्यालकावलीविराजितम् ⋆
प्रबुद्धमुग्धाम्बुजचारुलोचनं ⋆

सविभ्रमभ्रूलतम् ⋆
उज्ज्वलाधरं ⋆
शुचिस्मितं ⋆
कोमलगण्डम् ⋆
उन्नसम् ⋆
उदग्रपीनांस विलम्बिकुण्डलालकावलीबन्धुरकम्बुकन्धरं ⋆
प्रियावतंसोत्पल कर्णभूषणश्लथालकाबन्ध
 विमर्दशंसिभिः चतुर्भिराजानुविलम्बिभिर्भुजैर्विराजितम् ⋆
अतिकोमल दिव्यरेखालङ्कृत आताम्रकरतलं ⋆
दिव्याङ्गुलीयकविराजितम् ⋆
अतिकोमल दिव्य नखावली विराजितम् ⋆
अतिरक्ताङ्गुळीभिरलङ्कृतम् ⋆
तत्क्षणोन्मीलित पुण्डरीक सदृश चरणयुगळम् ⋆
अतिमनोहर किरीट मकुट चूडावतंस मकरकुण्डल
 ग्रैवेयक हार केयूर कटक श्रीवत्स कौस्तुभ
 मुक्तादामोदरबन्धन पीताम्बर काञ्चीगुण नूपुरादिभिः
 अत्यन्तसुखस्पर्शैर्दिव्यगन्धैर्भूषणैर्भूषितं ⋆
श्रीमत्या वैजयन्त्या वनमालया विराजितं ⋆
शङ्खचक्र गदासि शार्ङ्गादि दिव्यायुधैः सेव्यमानं ⋆
स्वसङ्कल्पमात्रावक्लृप्त जगज्जन्मस्थितिध्वंसादिके
 श्रीमति विष्वक्सेने न्यस्तसमस्तात्मैश्वर्यम् ⋆
वैनतेयादिभिः स्वभावतो निरस्त समस्त
 सांसारिकस्वभावैः ⋆
भगवत्परिचर्याकरणयोग्यैः ⋆
भगवत्परिचर्यैकभोगैः ⋆
नित्यसिद्धैः ⋆

अनन्तैः ⋆
यथायोगं सेव्यमानं ⋆
आत्मभोगेनाननुसंहित परादिकालम् ⋆
दिव्यामल कोमलावलोकनेन विश्वमाह्लादयन्तम् ⋆
ईषदुन्मीलित मुखाम्बुजोदरविनिर्गतेन ⋆
दिव्याननारविन्द शोभाजनकेन ⋆
दिव्यगाम्भीर्यौदार्य सौन्दर्य
  माधुर्याद्यनवधिक गुणगणविभूषितेन ⋆
अतिमनोहरदिव्यभावगर्भेण ⋆
दिव्यलीलालापामृतेन ⋆
अखिलजनहृदयान्तराण्यापूरयन्तं भगवन्तं
  नारायणं ध्यानयोगेन दृष्ट्वा ⋆
ततो भगवतो नित्यस्वाम्यम् ⋆
आत्मनो नित्यदास्यं च यथावस्थितमनुसन्धाय ⋆
कदाऽहं भगवन्तं नारायणं
  मम कुलनाथं मम कुलदैवतं मम कुलधनं
  मम भोग्यं मम मातरं मम पितरं मम सर्वं
  साक्षात्करवाणि चक्षुषा ⋆
कदाऽहं भगवत्पादाम्बुजद्वयं शिरसा धारयिष्यामि ⋆
कदाऽहं भगवत्पादाम्बुजद्वय परिचर्याशया
  निरस्तसमस्तेतर भोगाशः ⋆
अपगत समस्त सांसारिकस्वभावः ⋆
तत्पादाम्बुजद्वयं प्रवेक्ष्यामि ⋆
कदाऽहं भगवत्पदाम्बुजद्वय परिचर्याकरणयोग्यः
  तदेकभोगः तत्पादौ परिचरिष्यामि ⋆
कदा मां भगवान् स्वकीयया अतिशीतलया

दृशा अवलोक्य ⋆
स्निग्धगम्भीर मधुरया गिरा परिचर्यायां आज्ञापयिष्यति ⋆
इति भगवत्परिचर्यायां आशां वर्धयित्वा ⋆
तयैवाशया तत्प्रसादोपबृंहितया भगवन्तं उपेत्य ⋆
दूरादेव भगवन्तं शेषभोगे श्रिया सहासीनम् ⋆
वैनतेयादिभिः सेव्यमानम् ⋆
समस्तपरिवाराय श्रीमते नारायणाय नमः ⋆
इति प्रणम्य ⋆
उत्थायोत्थाय पुनः पुनः प्रणम्य ⋆
अत्यन्त साध्वसविनयावनतो भूत्वा ⋆
भगवत्पारिषद गणनायकैः द्वारपालैः
कृपया स्नेहगर्भया दृशाऽवलोकितः ⋆
सम्यगभिवन्दितैः तैस्तैरेवानुमतो भगवन्तमुपेत्य ⋆
श्रीमता मूलमन्त्रेण ⋆
मां ऐकान्तिकात्यन्तिक परिचर्याकरणाय परिगृह्णीष्व ⋆
इति याचमानः प्रणम्य ⋆
आत्मानं भगवते निवेदयेत् ॥

ततो भगवता स्वयमेवात्मसञ्जीवनेन अमर्यादशीलवता
अतिप्रेमान्वितेनावलोकनेनावलोक्य ⋆
सर्वदेशसर्वकालसर्वावस्थोचित
अत्यन्तशेषभावाय स्वीकृतः ⋆
अनुज्ञातश्च ⋆
अत्यन्तसाध्वसविनयावनतः ⋆
किङ्कुर्वाणः ⋆
कृताञ्जलिपुटः ⋆
भगवन्तमुपासीत ॥

ततश्चानुभूयमान भावविशेषः ⋆
निरतिशयप्रीत्या अन्यत् किञ्चित् कर्तुं द्रष्टुं
स्मर्तुमशक्तः ⋆
पुनरपि शेषभावमेव याचमानः ⋆
भगवन्तमेवाविच्छिन्न स्रोतोरूपेण
अवलोकनेनावलोकयन् आसीत ॥

ततो भगवता स्वयमेवात्मसञ्जीवनेन
अवलोकनेनावलोक्य ⋆
सस्मितमाहूय ⋆
समस्तक्लेशापहं ⋆
निरतिशयसुखावहम् ⋆
आत्मीयं ⋆
श्रीमत्पादारविन्दयुगळं ⋆
शिरसि कृतं ध्यात्वा ⋆
अमृतसागरान्तर्निमग्नसर्वावयवः सुखमासीत ॥

लक्ष्मीपतेर्यतिपतेश्च दयैकधाम्नोः
योऽसौ पुरा समजनिष्ट जगद्धितार्थम्।
प्राच्यं प्रकाशयतु नः परमं रहस्यं
संवाद एष शरणागतिमन्त्रसारः ॥

॥ इति श्रीवैकुण्ठगद्यं समाप्तम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥